# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - आचार्यद्वितीयवर्षम्, सत्र-३ | **प्रश्नपत्रम् – ५**<br>(C.E.5.3.3- New )<br>शुद्धाद्वैतमार्तण्डः, वेदान्तसंग्रहश्च | गुणाः - ७० |
|---|---|---|
| विषयः - सर्वदर्शनम् ( ऐच्छिकम् ) | | |
| दिनाङ्कः - ०८/१२/२०१८ | | समयः - १०:०० तः ०१:०० |

### प्रथमान्वितिः

**प्रश्नः १ कस्यचिद् एकस्य श्लोकस्य यथाग्रन्थं व्याख्यां लिखत ।** **( ०५ )**

(१) *तिरोभावे तु कार्यं हि वर्तते कारणात्मना ।*
*आविर्भावे तु कार्यं हि यथा मृदि घटादयः ॥*

(२) *द्वीतं तदेव द्वैतं स्यात् अद्वैतं तु ततोऽन्यथा ।*
*सर्वं खलु इदं ब्रह्म तज्जलानिति पठ्यते ॥*

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

(१) *शुद्धाद्वैतमार्त्तण्डग्रन्थस्य मङ्गलाचरणं व्याख्याय ग्रन्थस्य विषयवस्तु निरूपयत ।*

(२) *शुद्धाद्वैतमतानुसारं कार्यकारणभावसम्बन्धं प्रपञ्चयत ।*

### द्वितीयान्वितिः

**प्रश्नः ३ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां लिखत ।** **( ०५ )**

(१) *शुद्धाद्वैतविदां या हि प्रतीतिः सोत्तमा मता ।*
*भेदाभेदप्रतीतिस्तु मध्यमानां प्रकीर्तिता ॥*

(२) *तत्रैकाकी न रमते द्वितीयेच्छा निरूपिता ।*
*श्रुतिविद्भिरतो ज्ञेयं ब्रह्मैकं नान्यदेव हि ॥*

**प्रश्नः ४ कस्यचिदेकस्य उत्तरं निबध्नीत ।** **( १० )**

(१) *शुद्धाद्वैतमतानुसारं त्रिविधम् अधिकारिनिरूपणं कुरुत ।*

(२) *"जन्माद्यस्य यतः" इति सूत्रार्थं शुद्धाद्वैतग्रन्थदिशा स्पष्टीकुरुत ।*

### तृतीयान्वितिः

**प्रश्नः ५ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां कुरुत ।** **( ०५ )**

(१) *चतुर्विधं दृक्पदार्थं प्रतिपादयत ।*

(२) *दृश्यं जगत् यथाग्रन्थं निरूपयत ।*

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) अध्यासलक्षणं विलिख्य तस्य उदाहरणपूर्वकं समन्वयं प्रदर्शयत ।*

*(२) यथाग्रन्थं पञ्चीकरणप्रक्रियां प्रतिपादयत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां कुरुत ।** **( ०५ )**

*(१) ''ज्ञानादेव मुक्तिः न तु कर्मणा'' इति स्पष्टयत ।*

*(२) वेदान्ताधिकारी कः इति प्रतिपादयत ।*

**प्रश्नः ८ कस्यचिदेकस्य उत्तरं निबध्नीत ।** **( १० )**

*(१) त्रिविधां लक्षणां यथाग्रन्थं प्रतिपादयत ।*

*(२) क्षेत्रक्षेत्रज्ञनिरूपणं यथाधीतग्रन्थं विशदयत ।*

**प्रश्नः ९ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तरं लिखत ।** **( १० )**

*(१) शुद्धाद्वैतस्य प्रर्वतकाः के ?*

*(२) शुद्धाद्वैतमार्तण्डः केन विरचितः ?*

*(३) जडजीवाः कुतः उद्भूताः भवन्ति ?*

*(४) 'सुबोधिनी' टीका कस्य ग्रन्थस्य उपरि विद्यते ?*

*(५) ब्रह्म स्वेच्छया इदं सर्वं किमर्थम् अभूत् ?*

*(६) जीवेश्वरयोः उपाधितः भेदं के प्रतिपादयन्ति ?*

*(७) हरेः शरीरं कीदृशं स्मृतम् ?*

*(८) वेदान्तसंग्रहः केन लिखितः ?*

*(९) शब्दगुणकं किमस्ति ?*

*(१०) किं नाम प्रमेयम् ?*

*(११) को नाम अपवादः ?*

*(१२) शब्दस्य वृत्तयः कतिविधाः ?*

*(१३) ब्रह्मप्रतिपादनस्य फलं किम् ?*

*(१४) को नाम शमः ?*

*(१५) ज्ञानं कतिविधम् ? किं च तत् ?*

--००--